# ॥ बालबोधसङ्ग्रहः ॥

.. bAlabodhasa NgrahaH ..

sanskritdocuments.org

July 25, 2016

# Document Information

Text title : baalabodhasaNgrahaH
File name : bAlabodhasangraha.itx
Category : vedanta
Location : doc_z_misc_shankara
Author : Shankaracharya
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : Sunder Hattangadi sunder at hotmail.com
Proofread by : Sunder Hattangadi sunder at hotmail.com
Latest update : December 23, 2012
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

# ॥ बालबोधसङ्ग्रहः ॥

विषयसूचिका ।

१ आध्यात्मविद्याप्रबोधप्रकारः ।
२ ज्ञानस्वरूपम्
३ साधनचतुष्टयम्
४ आत्मैक्यज्ञानविचारणा
५ पञ्चविंशति तत्त्वानि
६ अन्तःकरणचतुष्टयम्
७ अनिर्वचनीयो आत्मा
८ देशिकस्य करुणया ज्ञानप्राप्तिः

श्रीमच्छङ्करभगवत्पादचरणारविन्दाभ्यान्नमोनमः ॥

आध्यात्मविद्याप्रबोधप्रकारं व्याख्यास्यामः ।
आधिभौतिकाधिदैविकाध्यात्मिकादि तापत्रयाग्निसन्तप्तः सकलसाधनोपेतः संसाराद्विरम्य शिष्यः सद्गुरुं शरणं गत्वा साष्टाङ्गं प्रणिपत्य विज्ञप्तिं करोति ।

भो स्वामिन् ! मम संसारनिवृत्तिं कुरु ।

गुरुरुवाच -

अरे शिष्य तव संसारनिवृत्तिः ज्ञानेन भवितव्या ।

ज्ञानं च श्रवणमनननिदिध्यासनैः ब्रह्मसाक्षात्कारो भवति ।

शिष्य उवाच -

भो स्वामिन् श्रवणं नाम किम्? मननं नाम किम्? निदिध्यासनं नाम किम्?

गुरुरुवाच -

भो वत्स !श्रवणम् नाम वेदान्तवाक्यानामुपक्रमोपसंहारतात्पर्यलिङ्गानां साधनचतुष्टययुक्तः सन् श्राव्यम् ।
मननं नाम श्रुतार्थस्य उपपत्त्यनुपपत्तिभ्यां युक्तिभिरालोचनं मननम् । निदिध्यासनं नाम निश्चितार्थस्य तदेकनिष्ठत्वेन संशयविपर्यय त्यागेन अवस्थानं निदिध्यासनम् । स एव फलितसाक्षात्कारः । श्रुतिवाक्यं प्रमाणम् । भिद्यते
हृदयग्रन्थिः छिद्यते सर्व संशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ॥ [मुण्डक २:८]

शिष्यः -

भो स्वामिन् ! साधनचतुष्टयं नाम किम् ?

गुरुरुवाच -

नित्यानित्यवस्तुविवेकः ।
इहामुत्रार्थफलभोगविरागः ।
शमादिषट्कम् ।
मुमुक्षुता च ।
नित्यमात्मस्वरूपं हि दृश्यन्तद्विपरीतकम् ।
एवं यो निश्चयः सम्यक् विवेकोऽस्य नरस्य वै ॥

जगत्सर्वमनित्यम् । ब्रह्मैव नित्यम् । इहामुत्रफलभोग विरागोनाम
ब्रह्मादिस्थावरान्तेषु वैराग्यं विषयेष्वनु ।
तथैव काकविष्ठायाः वैराग्यं तद्धि निर्मलम् ॥

इहपरसुखविषयेषु वैराग्यं विरागः ।
शमादिषट्कं नाम शमोदमउपरतिस्तितिक्षा श्रद्धासमाधानम् ।
शमो नाम - सदैव वासनात्यागः शमोऽयमिति शब्दितः ।
दमोनाम - निग्रहो बाह्यवृत्तीनां दम इत्यभिधीयते ।
उपरतिर्नाम - विषयेभ्यः परावृत्तिः परमोपरतिर्हि सा ।
तितिक्षा नाम - सहनं सर्वदुःखानां तितिक्षा शुभामता ।
श्रद्धा नाम - निगमाचार्यवाक्येषु भक्तिः श्रद्धेति विश्रुता ।
समाधानं नाम - चित्तैकाग्र्यं तु संलक्ष्ये समाधानमिति श्रुतम् ।
एतत् शमादिषट्कम्।
मुमुक्षुता - संसारबन्धनान्मुक्तिः कथं स्यान्मे कदा विधे ।
इति यासु दृढा बुद्धिर्वक्तव्या सा मुमुक्षुता ॥

एवं साधनचतुष्टयसम्पन्नस्यैव ब्रह्मात्मैक्यज्ञाने अधिकारः ।
आत्मैकविज्ञानं विचारेण विना न जायते । विचारः कार्यः।

शिष्य उवाच -
विचारोनाम ?

गुरुरुवाच -
अहं कः ? इदं सर्वं कथं जातम् ? कुत्र वा लयं गच्छति ?
सदा सद्भिः विचारः कार्यः ।

शिष्य उवाच -
भो स्वामिन् ! अहं तु विचारं न जानामि सन्त कुत्र वा सन्ति ?
को वेद ? त्वमेव मां करुणाकटाक्षपोतेन संसारवारिधेः
पारं दर्शय त्वमेव मे गतिः ।

श्रीगुरुरुवाच -
भो वत्स ! मय्येव तव दृढा भक्तिश्चेत् शृणु ।
त्वं तु देहो न भवसि । अतः जडत्वात् दृश्यत्वात् दृश्यादन्यो

द्रष्टेति न्यायात् । अमङ्गलत्वाच्च । नित्यत्वाच्च ।
सविकारत्वाच्च जात एव देहस्त्वं न भवसि ।
त्वं तु चैतन्यमात्रम् ।

शिष्य उवाच -
भो स्वामिन् ! अहं देहो न भवामि चेत् देहस्य सुखदुःखं मां
बाधते । अत एव देह एवाहम् ।

गुरुरुवाच -
देहो जडः ।

शिष्य उवाच -
कथं जडः देहस्तावत् बाल्यमारभ्य नित्यं वर्धते जडस्य
वृद्धिर्न संभवति । एवमेव सर्वम् ।

गुरुरुवाच -
भो शिष्य ! देहतादात्म्येन तव सुखदुःखं प्रतिभाति ।
यथा धनादिकन्नष्टं चेत् दुःख भवति ।
तेनैव द्रव्यादिकं स्वयं भवति वा
सुखदुःखयोः कारणाभावेऽपीति ।
यथा लाभालाभे तादात्म्येन सुखदुःखे भासतः ।
तथैव देहतादात्म्येन सुखदुःखे प्रतिभासतः ॥

यथा द्रव्यादिभ्यः स्वयं भिन्नः तथैव देहात् स्वयं भिन्नः ।
जड त्वं च श्रृणु - देहो वर्धते इति कृत्वा देहो जडो न
भवतीति यद्वदसि तदसत् । जडस्यापि वृद्धिदर्शनात् ।
यथा वेदिका मृद्रूपा जडापि मृन्निक्षेपेण कुड्यादिरूपेण
वर्धते । किं तन्मात्रेण चैतन्यं भवति वा ।
तथैवान्नमयशरीरस्य पुनःपुनः अन्नं नित्यं निक्षेपेण
देहो वर्धते । अत एव जडः । अमङ्गळत्वाच्च ।
श्रृणु - जन्मकालपरामर्शे अमङ्गळं सिद्धमेव ।
तव देहः दृश्यत्वं कथमिति चेत् मम शरीरे
श्यामगौरवत्वादिना प्रतीयमाने कृश स्थूलत्वादिभिश्च
सिद्धमेव । त्वं तु द्रष्टा । अनित्यत्वं श्रृणु ।
बाल कौमाराद्यवस्थायुक्तत्वात् सविकारित्वम् ।
त्वं तु देहाद्यविकारः । नित्यश्च । योऽहं बाल्ये क्रीडासक्तः
यौवने विषयासक्तः वार्धक्ये चिन्तायुक्तः तावत्तावत्
सोऽहमित्यनुभवात् ताभिर्व्यवस्थाभिर्युक्तस्य नित्यत्वम् ।
तस्माद्देहो न भवसि । त्वं चिन्मात्रोऽसि साक्षी ।

शिष्य उवाच -

भो स्वामिन् ! तव प्रसादलेशात् देहो न भवामीति मम ज्ञानं जातम् । तावता मम को लाभः ?

गुरुरुवाच -

यदा त्वं पञ्चीकृतपञ्चमहाभूत समभवस्थूलशरीरं न भवसि तदा नामरूपजातिवर्णाश्रमादयस्तव न सन्ति । एतत् सर्वं स्थूल शरीरस्यैव ।

शिष्य उवाच -

भो स्वामिन् ! त्वत् प्रसादात् सत्यं त्वदाज्ञया अहं स्थूलदेहो न भवामि । तत्सम्बन्धाः वर्णाश्रमदयः स्त्रीपुंनपुंसकादयः श्यामगौरवत्वादि नामरूपादयः मम न सन्ति ।

अतः परमिन्द्रियाण्यहम् । इन्द्रियेषु सत्सु पश्यामि श्रृणोमि स्पृशामि इत्याद्यनुभवाच्च इन्द्रियाण्यहमेव ।

गुरुरुवाच -

भो वत्स ! इन्द्रियाण्यपि जडानि त्वं न भवसि पञ्चभूतकार्यत्वात् ।

शिष्यः -

भो स्वामिन् ! इन्द्रियाणि जडानि कथं भूतकार्याणि कथम् ?

गुरुरुवाच -

यो वत्स इन्द्रियाणि आत्मानं जानन्ति परमपि न जानन्ति यथा प्रदीपवत् । भो श्रोत्र इदानीं त्वं अत्र तिष्ठसीत्युक्ते भो स्वामिन् अत्र स्थास्यामीति वक्तुमसमर्थं एवं सर्वाणि करणानि अत जडानि । भूतकार्यं कथमिति श्रृणु ।

श्रोत्रेन्द्रियमाकाशकार्यम् । आकाशाध्यात्मिक गुणशब्दग्रहणे साधनम् । त्वगिन्द्रियं वायुकार्यम् ।

वाय्वाध्यात्मिकगुणस्पर्शग्रहणे साधनम् ।

चक्षुस्तेजः कार्यम् । तेज आध्यात्मिकगुणरूपग्रहणे साधनम् ।

रसनेन्द्रियमपां कार्यम् । जलाध्यात्मिकगुणरसग्रहणे साधनम् ।

एतानि ज्ञानेन्द्रियाणि । पञ्चभूतसत्त्वगुणादुत्पन्नानि ।

अथ कर्मेन्द्रियाणि श्रृणु ।

कर्मेन्द्रियाणि -

वाक् आकाशकार्यम् । आकाशाध्यात्मिकगुणशब्दो वदति ।

पाणीन्द्रियं वायुकार्यम् । वाय्वाध्यात्मिकगुणेन गृह्णाति ।

पादेन्द्रियं तेजः कार्यम् । तेज आध्यात्मिककार्यं गमनादिकं करोति । गुह्येन्द्रियमपां कार्यम् । जलाध्यात्मिककार्यम् । मूत्ररेतोत्सर्गादिकं करोति । गुदेन्द्रियं पृथिवीकार्यम् ।

पृथिव्याध्यात्मिकगुणम् । पुरीषादिकं करोति ।
एवं कर्मेन्द्रियाणि पञ्चभूतरजोगुणेभ्यः उत्पन्नानि ।
पञ्चभूततमोगुणात् विषया उत्पन्नाः ।
शब्दस्पर्शरूपरसगन्धाः वचनादानगमन विसर्गानन्दाः ।
एतानि सर्वाणीन्द्रियाणि पञ्चभूताध्यात्मिक कार्याणि जडानि ।
स्वस्वदेवतानुग्रहेण स्वस्वविषयान् प्रति वर्तन्ते ।

शिष्यः -
कस्येन्द्रियस्य किं दैवतम् ?

गुरुरुवाच -
श्रोत्रेन्द्रियस्य दिगधिदैवतम् ।
त्वगिन्द्रियस्य वायुरधिदैवतम् ।
चक्षुरिन्द्रियस्य सूर्योऽधिदैवतम् ।
रसनेन्द्रियस्य वरुणोऽधिदैवतम् ।
घ्राणेन्द्रियस्याश्विनीदेवतावधिदैवतम् ।
वागिन्द्रियस्याग्निरधिदैवतम् ।
पाणीन्द्रियस्य इन्द्रोऽधिदैवतम् ।
पादेन्द्रियस्य विष्णुरधिदैवतम् ।
पाय्विन्द्रियस्य मृत्युरधिदैवतम् ।
गुह्येन्द्रियस्य प्रजापतिरधिदैवतम् ।
इन्द्रियाणामधिभूतं च श‍ृणु -
श्रोत्रेन्द्रियस्य श्रोतव्यमधिभूतम् ।
नेत्रेन्द्रियस्य द्रष्टव्यमधिभूतम् ।
त्वगिन्द्रियस्य स्पर्शनोऽधिभूतम् ।
रसनेन्द्रियस्य रसग्रहणमधिभूतम् ।
घ्राणेन्द्रियस्य गन्धग्रहणमधिभूतम् ।
वागिन्द्रियस्य वक्तव्यमधिभूतम् ।
पाणिन्द्रियस्य दातव्यमधिभूतम् ।
पादेन्द्रियस्य गमनमधिभूतम् ।
पाय्विन्द्रियस्य विसर्जनमधिभूतम् ।
उपस्थेन्द्रियस्य उत्सर्जनमधिभूतम् ।
सर्वाणि करणानि स्वस्वदेवतानुग्रहणैव स्वस्वविषयान् जानन्ति ।
अत एव जडानि तानि त्वं न भवसि ।

शिष्य उवाच -
भो स्वामिन् ! सत्यम् इन्द्रियाणि जडानीति मम ज्ञानं जातम् ।
परं मन एवाहम् । स्वस्थे मनसि पश्यामि श‍ृणोमि तदभावे

न पश्यामि न श्रृणोमि अत एव मन एवाहम् ।

गुरुरुवाच -

भो वत्स ! मनः कथं त्वं भवसि ? मे मनः इदानीं समाधानतया तिष्ठतीत्यनुभवात् मनसोऽपि भिन्न एव त्वं मनस्तव दृश्यम् । मनसस्त्वं द्रष्टा मनस्तवाधीनत्वाच्चात एव मनो न भवसि । प्राणे पश्यामि श्रृणोमि प्राणाभावे न पश्यामि न श्रृणोमि अत एव ।

शिष्य उवाच -

भो स्वामिन् ! सत्यं मनो न भवामि बुद्ध्या निश्चितेऽर्थे मनो धावति । अत एव बुद्धिरेवाहम् । साप्यन्तःकरणवृत्तित्वात् । अत एव प्राण एव अहमस्मि ।

गुरुरुवाच -

भो वत्स ! प्राणस्त्वं न भवसि जडत्वात् ।

शिष्यः -

भो स्वामिन् ! प्राणो जडः कथम् ?

गुरुः -

श्रृणु रात्रौ प्रसुप्तस्य पुरुषस्य वस्तूनि चोरो गृहीत्वा गच्छति तदानीं प्राणस्तिष्ठत्येव । कथं नावबुध्यते । अत एव जडः ।

शिष्यः -

भो स्वामिन् ! प्राणो जडश्चेत् जडशरीरं कथं चेष्टयति जडस्य चेतनायोगात् ।

गुरुः -

श्रृणु जडस्यापि जडचालकत्वं लोके दृष्टमस्ति यथा चण्डमारुतः गृहोपरिस्थिततृणादीन् नभसि भ्रामयित्वान्यत्र पातयति । किन्तावता वायुश्चैतन्यं भवति वा । एवं प्राणस्यापि देहचेष्टकत्वम् । अत एव प्राणोऽपि त्वं न भवसि ।

शिष्यः -

भो स्वामिन् ! त्वदाज्ञया एतत्सर्वमहं न भवामि । तावता मम को लाभः ?

गुरुः-

अरे शिष्य ! सावधानतया श्रृणु । एतत् सर्वं सप्तदशकं लिङ्गशरीरं त्वं यदा न भवसि । तदानीं देवतिर्यङ्मनुष्यादिजन्मादिकं नास्ति । यथा जानु भग्नपङ्गोरिव गमनागमनं तव नास्त्येव ।

शिष्यः -

भो स्वामिन् ! त्वत्प्रसादादेव सत्यं परं च प्राणमनो बुद्धि
दशेन्द्रिय समन्वितम् । अपञ्चीकृत भूतोत्थं सूक्ष्माङ्गं
भोगसाधनम् । भो स्वामिन् ! एतत्सर्वं अहं न भवामि तर्हि
कोऽहमिति मामहं न जानामि । कृपया स्वामिना वक्तव्यम् ।

गुरुः -

भो शिष्य ! इदमेव तव कारणशरीरं कथम् ?
भो शिष्य अरे सर्वं जानासि स्वात्मानमेव न जानामीति वदसि ।
इदमेव तवाज्ञानं सर्वेषां स्थूलसूक्ष्म शरीराणां कारणत्वात्
कारणमित्याभिधीयते । इयमेवाविद्या संसारानर्थदायिनी ।

" आब्रह्म ज्ञानैक निलया अस्या निवृत्तिरेव मुक्तिः ।
मुमुक्षिभिः प्रयत्नैः परिहर्तव्या । "

शिष्यः -

भो स्वामिन् ! कथं परिहर्तव्या ?

गुरुः -

अरे शिष्य ! त्वमेव माऽहं न जानामीति वदसि । तर्हि त्वत्तोऽन्यः
कोऽपि वदति वा ? वक्ता श्रोता द्रष्टा त्वमेव ।

शिष्यः -

अस्मिन्नर्थे श्रुतिः प्रमाणं वर्तते वा ?

गुरुः -

अरे वत्स ! सर्वेषां वेदान्तानां अत्रैव श्रुतिवाक्यं प्रमाणम् ।
" नान्यतोऽस्मि वक्ता नान्यतोऽस्मि श्रोता नान्यतोऽस्मि मन्ता
नान्यतोऽस्मि द्रष्टा चेति "
येन वा पश्यति येन वा श्रृणोतीत्यादि प्रमाणानि बहूनि सन्ति ।
त्रिषु धामसु यत् भोज्यं भोक्ता भोगश्च यत् भवेत् ।
तेभ्यो विलक्षणः साक्षी चिन्मात्रोऽहं सदाशिवः ॥

स्मृतिरपि - क्षेत्रज्ञं चापि मां विद्धि सर्वभूतस्तमात्मानमिति ।
पुराणं च -

सकल इदमहं च वासुदेवः परमः पुमान् परमेश्वरः स एकः ।
इति मतिरमला भवत्यन्ते हृदयगते व्रज तां विहाय दूरात् ।
एवं विज्ञानेन स्वात्मरामः सन् यस्तिष्ठति स ब्रह्म स शिवः
स हरिः सेन्द्रः सोऽक्षरः परमस्वराट् । ज्योतींषि विष्णुः
भुवनानि विष्णुः वनानि विष्णुः गिरयो दिशश्च ।
नद्यः समुद्राश्च स एव सर्वम् । इदं त्वं नास्ति विप्रवर्य ।
एतादृशेनानुभवेन शिष्ययुक्तः सन् स्वानुभवस्थितिं दर्शयति ।
न हि बन्धपदं न हि मोक्षपदं न हि पापपदं न हि पदम् ।

न हि रिक्तपदं न हि पूर्णपदं किं रोदिषि मानस सर्वसमम् ।
अहो अहं नमो मह्यं दक्षो नास्तीति मत्समः ।
असंस्पर्शशरीरेण येन विश्वं चिरं धृतम् ।
मयि सुखबोधपयोधौ महति ब्रह्माण्ड बुदबुदसहस्रम् ।
मायामयेन मरुता भूत्वा भूत्वा पुनस्तिरोधत्ते ।
हव्यमहं कव्यमहं हेयोपादेयभावशून्योऽहम् ।
हरिरहमस्मि हरोऽहं विधिरप्यहमस्मि कारणं तेषाम् ।
धर्माधर्ममयोऽहं धर्माधर्मादिबन्धरहितोऽहम् ।
धार्मिकजनसुलभोऽहं धन्योऽस्मि धातुरादिभूतोऽहम् ॥

मन्योऽहमस्मि महतां मन्दमतीनां माननीयोऽहम् ।
मद् मान राग मोहित मानस दुर्वासना दुरापोऽहम् ।
नाहं नमामि देवान् एते नमस्यन्ति च नित्यं माम् ।
मत्तः परतरो नास्ति चिन्मात्रोऽहं सदाशिवः ।
किमिदं किमस्य रूपं कथमिदमुदभूदमुष्य को हेतुः ।
इति न कदापि चिन्त्यम् ।
चिन्त्यं मायेति धीमता विश्वम् ।
गुरुणैव नावा प्राक्तनभाग्यानुकूलमारुतेन ॥

दुस्सहदुःखतरङ्गोत्तुङ्ग संसार सागरोत्तीर्णः ।
शरणं न हि मम जननी सुतो न सोदरश्चान्ये ॥

परमं शरणं इदं मे चरणं मम मूर्ध्नि देशिकन्यस्तम् ।
आस्ते देशिकचरणं निरवधिरास्ते मदीक्षणे करुणा ॥

आस्ते किमपि तदुक्तं किमितःपरमस्मि जन्मसाफल्यम् ॥

इदं ज्ञानं परं श्रेष्ठं सतां संमतमादरात् ।
यः श‍ृणोति च मेधावी स मुक्तो नात्र संशयः ।

॥ इति श्रीपरमहंसपरिव्राजकाचार्य
श्रीमत् शङ्कराचार्यविरचितबालबोधसङ्ग्रहः समाप्तः ।

Encoded and proofread by Sunder Hattangadi sunderh at hotmail.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

---

.. bAlabodhasa NgrahaH ..
was typeset on July 25, 2016

Please send corrections to *sanskrit@cheerful.com*